## प्रथमः पाठः

# मङ्गलाचरणम्

''मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि च प्रथन्ते'' इति उक्तिमनुसृत्य मङ्गलाचरणम् अनिवार्यमस्ति सिद्ध्यर्थम्। 'अ' कारोऽपि मङ्गलवाचकः। अतः तस्मादेव पाणिनेः व्याकरणम् आरब्धम् 'अइउण्' इत्यादिना।

एतदुद्देश्यमेव मनसि निधाय पाठ्यपुस्तकस्यास्य आदौ छात्राणां निर्विघ्नपरिसमाप्त्यर्थम् मङ्गलाचरणं प्रस्तुतमस्ति। अत्र विद्यादेव्याः सरस्वत्याः, त्रैलोक्यनाथस्य हरेः, परब्रह्मणश्च मङ्गलस्तुतिः कृता।

**पूर्णेन्दुसुन्दरमुखि प्रतिभाभिरामे**
**वामे विधेः सुवचसां वचसां विरामे।**
**गीर्वाणवाणि! भुवनाऽऽभरणं भवत्या**
**वन्दे दयार्द्रचरणं शरणं जगत्याः॥1॥**

**अन्वयः** – पूर्णेन्दुसुन्दरमुखि! प्रतिभाभिरामे! वामे। विधेः सुवचसां (च) वचसां विरामे! गीर्वाणवाणि! भवत्याः भुवनाभरणं जगत्याः शरणं दयार्द्रचरणं वन्दे।

**शब्दार्थः** – पूर्णेन्दुसुन्दरमुखि – पूर्णिमाचन्द्रसुन्दरमुखि! (हे पूर्णिमा के चन्द्रमा के समान सुन्दर मुख वाली!) प्रतिभाभिरामे – बुद्धिसुखदे (बुद्धि के लिए सुखद), वामे – सुन्दरि, विधेः – ब्रह्मणः (ब्रह्मा का) सुवचसाम् – श्रेष्ठगिराम् कवीनाम् (श्रेष्ठ वाणी वाले कवियों के), वचसाम् – गिराम् (वाणी का), विरामे – विश्रामे, गीर्वाणवाणि – हे सरस्वति देववाणि, भुवनाभरणम् – संसारस्याभूषणम् (संसार के आभूषण को), दयार्द्रचरणम् – दयासिक्तचरणम् (दया से गीले चरणों को),

**तान् कल्पनागत कलाः सकला व्रजन्ति,**
**भावाःगुणेन सहिता अपि तानु यान्ति।**
**दासोपमा नवरसा अपि तान् भजन्ति,**
**सर्वं विहाय भवतीं भुवि ये यजन्ति॥2॥**

**अन्वयः** – ये भुवि सर्वं विहाय भवतीं यजन्ति, तान् प्रति सकला कल्पनागतकलाः व्रजन्ति उ तान् गुणेन सहिताः भावाः अपि यान्ति दासोपमाः नवरसाः तान् भजन्ति।

**शब्दार्थः** – यजन्ति – पूजयन्ति/यजनं कुर्वन्ति (पूजन करते हैं), व्रजन्ति – गच्छन्ति (जाते हैं/प्राप्त करते हैं), उ – निपाते / पादपूर्तये, यान्ति – गच्छन्ति (जाते हैं), दासोपमाः – सेवकतुल्याः (सेवकों के समान), भजन्ति – सेवां कुर्वन्ति (सेवा करते हैं)

**यं शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनो,**
**बौद्धा बुद्ध इति प्रमाणपटवः कर्तेति नैयायिकाः।**
**अर्हन्नित्यथ जैन-शासन-रताः कर्मेति मीमांसकाः**
**सोऽयं वो विदधातु वाञ्छितफलं त्रैलोक्यनाथो हरिः॥3॥**

**अन्वयः** – यं शैवाः शिव इति समुपासते वेदान्तिनो ब्रह्म इति बौद्धाः बुद्ध इति प्रमाणपटवः नैयायिकाः कर्ता इति अथ जैनशासनरताः अर्हन् इति मीमांसकाः कर्म इति अयं सः त्रैलोक्यनाथः हरिः वः वाञ्छितफलं विदधातु।

**शब्दार्थः** – प्रमाणपटवः – प्रमाणे चतुराः (प्रमाण देने में कुशल), विदधातु – प्रदानं करोतु (प्रदान करें),

**हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।**
**तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥4॥**

**अन्वयः** – सत्यस्य मुखं हिरण्मयेन पात्रेण अपिहितम्, पूषन्! सत्यधर्माय दृष्टये तत् त्वं अपावृणु।

**शब्दार्थः** – हिरण्मयेन – स्वर्णनिर्मितेन (स्वर्ण निर्मित), अपिहितम् – आच्छादितम् (ढका हुआ), पूषन् – हे सूर्य ! ब्रह्म!, सत्यधर्माय – शाश्वततत्त्वाय (नित्य वस्तु के लिए), अपावृणु – उद्घाटनं करोतु (खोले),

**ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।,**
**तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥5॥**

**अन्वयः** – जगत्यां यत् किञ्च जगत् इदं सर्वं ईशावास्यम् (अतः) तेन त्यक्तेन (एव) भुञ्जीथाः कस्यचिद् धनम् मा गृधः।

**शब्दार्थः** – ईशावास्यम् = ईश्वरस्य आवासः (भगवान् का निवास), भुञ्जीथाः=उपभोगं कुरु (उपभोग करिए) मा=न, गृधः = लोभं कुरु (लालच करिए),

**यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति।**
**दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु।।6॥**

**अन्वयः** – यत् जाग्रतो दूरम् उदैति उ तद् सुप्तस्य तथैव एति (तत्) दैवं दूरङ्गमं ज्योतिषाम् एकं ज्योतिः मे तत् मनः शिवसङ्कलपम् अस्तु।

**शब्दार्थः** – उदैति – उदयं भवति (उदित होता है), एति–आगच्छति (आता है), शिवसङ्कल्पम्– कल्याणकारिभावयुक्तः (मांगलिक भावों वाला)

**भद्रङ्कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः।**
**स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेमहि देवहितं यदायुः॥7॥**

**अन्वयः** – देवाः! यजत्राः कर्णेभिः भद्रं शृणुयाम, अक्षभिः भद्रं पश्येम, तुष्टुवांसः (वयम्) देवहितं यद् आयुः स्थिरैः अङ्गैः तनूभिः व्यशेमहि।

**शब्दार्थः** – यजत्राः – याजिकाः (यज्ञ करने वाले), अक्षभिः – नयनैः (आँखों से), तुष्टुवांसः – सन्तुष्टाः सन्तः (सन्तुष्ट रहते), तनूभिः – शरीरैः (शरीरों से), व्यशेमहि –भोगं कुर्मः (भोग करें)

## अभ्यासः

**1. एकपदेन उत्तरत–**

क) कस्याः चरणं वन्दे?

ख) त्रैलोक्यनाथं शैवाः किम्नाम्ना स्तुवन्ति?

ग) नैयायिकाः किम्नाम्ना स्तुवन्ति?

घ) सत्यस्यमुखं केन अपिहितम्?

ङ) जगत्यां सर्वं किम्?

**2. एकवाक्येन उत्तरत**

क) त्रैलोक्यनाथः किं विदधाति?

ख) किं निमित्तं सत्यमुखम् अपावृणोतु?

ग) दूरङ्गमं ज्योतिषां ज्योतिः कीदृगस्ति?

घ) कैः तनूभिः आयुः व्यशेमहि?

ङ) सरस्वत्याः मुखस्य किमुपमानम् ?

**3. त्रिचतुर्भिः वाक्यैः उत्तरत**

क) सर्वं विहाय भवतीं ये यजन्ति ते किं किं लभन्ते?

ख) त्रैलोक्यनाथं विविधाः धार्मिकाः किम्नामभिः मन्यन्ते?

ग) कीदृशीं जगतीं वन्दे?

घ) कीदृशं मे मनः भवतु?

ङ) सत्यमुखमपिहितं कथमस्ति?

**4. नामोल्लेखपुरस्सरं सन्धिविच्छेदं कुरुत–**

क) पूर्णेन्दुः

ख) प्रतिभाभिरामे

ग) अर्हन्निति

घ) स्थिरैरङ्गैः

ङ) ब्रह्मेति

च) भुवनाऽऽभरणम्

5. **समासविग्रहं कुरुत-**

क) गीर्वाणवाणि

ख) त्रैलोक्यनाथः

ग) सत्यधर्माय

घ) दयार्द्रचरणम्

ङ) प्रतिभाभिरामे

च) वाञ्छितफलम्

6. **रिक्तस्थानानि पूरयत-**

क) ..............भुवनाऽऽभरणं भवत्याः।

ख) अर्हन्नित्यथ..............कर्मेति.................।

ग) सोऽयं वो विदधातु वाञ्छितफलं.........हरिः।

घ) तत्त्वं...............सत्यधर्माय दृष्टये।

ङ) दासोपमा...........अपि तान् भजन्ति।

च) वामे विधेः..........वचसां विरामे।

7. **सङ्केतितश्लोकानाम् अन्वयं लिखत-**

क) पूर्णेन्दु.................शरणं जगत्याः।।

ख) हिरण्मयेन.............दृष्टये॥

ग) यज्जाग्रतो.................शिवसङ्कल्पमस्तु॥

घ) यं शैवाः..........त्रैलोक्यनाथो हरिः॥

ङ) तान् कल्पनागत...........यजन्ति॥

च) ईशावास्यम्..........कस्यस्विद्धनम्।

8. **निर्देशानुसारं परिवर्तयत-**

क) पूर्णेन्दुसुन्दरमुखि! .......................(सप्तमी एकवचनम्)

ख) प्रतिभाभिरामे! ......................(षष्ठी बहुवचनम्)

ग) वामे! ..............................(चतुर्थी एकवचनम्)

घ) गीर्वाणवाणि! .......................(पञ्चमी द्विवचनम्)

ङ) विरामे! ............................(तृतीया एकवचनम्)

**9. यथोचितं योजयत-**

| | अ | ब |
|---|---|---|
| क) | शैवाः | अर्हन् |
| ख) | बौद्धाः | कर्ता |
| ग) | ब्रह्म | वेदान्तिनः |
| घ) | मीमांसकाः | हिरण्मयपात्रम् |
| ङ) | जैनाः | शिवः |
| च) | नैयायिकाः | बुद्धः |
| छ) | सत्यमुखम् | कर्म |

**10. पूर्तिं कुरुत-**

क) पूर्णेन्दु........................जगत्याः।

ख) यं शैवाः........................हरिः।

ग) ईशावास्यम्........................धनम्।

घ) यज्जाग्रतो........................अस्तु।

ङ) तान्........................यजन्ति।

च) भद्रं........................यदायुः।

**योग्यताविस्तारः -**

- श्लोकानां सारांशं स्वभाषया लिखन्तु।
- सरस्वतीवन्दनापरकश्लोकानां चयनं कुरुत।
- अन्यानि मङ्गलश्लोकानि चिनुत कण्ठस्थीकुरुत च।